स्वर्णजयन्तीवर्षम् 2019-20

॥ श्रीः ॥

श्रीमद्गङ्गेशोपाध्यायविरचितं

# तत्त्वचिन्तामणौ

## प्रत्यक्षखण्डम्

( प्रथमो भागः )


कलिकातास्थ-संस्कृतमहाविद्यालयाध्यापक-

श्री कामाख्यानाथतर्कवागीशेन

परिशोधितम्



केन्द्रीयसंस्कृतविश्वविद्यालयः

संसदः अधिनियमेन स्थापितः

(प्राक्तन राष्ट्रियसंस्कृतसंस्थानम्, मानितविश्वविद्यालयः)

भारतसर्वकारस्य मानवसंसाधनविकासमन्त्रालयाधीनः

स्वर्णजयन्तीवर्षम् 2019-20

॥ श्रीः ॥

श्रीमद्गङ्गेशोपाध्यायविरचितं

# तत्त्वचिन्तामणौ

## प्रत्यक्षखण्डम्

श्रीमथुरानाथतर्कवागीशकृतव्याख्यया तथैव श्रीमत्पण्डित-
जयदेवकृतव्याख्यया च सङ्गृहीतोद्धरणसहितम्

( प्रथमो भागः )

कालिकातास्थ-संस्कृतमहाविद्यालयाध्यापक-

**श्रीकामाख्यानाथतर्कवागीशेन**

परिशोधितम्

**केन्द्रीयसंस्कृतविश्वविद्यालयः**

**संसदः अधिनियमेन स्थापितः**

(प्राक्तनं राष्ट्रियसंस्कृतसंस्थानम्, मानितविश्वविद्यालयः)

भारतसर्वकारस्य मानवसंसाधनविकासमन्त्रालयाधीनः

Published with the Financial Assistance from Central Sanskrit University,
Ministry of Human Resource Development, Govt. of India

Publisher :
**Registrar**
**Central Sanskrit University**
(Formerly Rashtriya Sanskrit Sansthan, Deemed to be University)
56-57, Institutional Area, Janakpuri, New Delhi-110058
EPABX : 28524993, 28521994, 28524995
website : www.sanskrit.nic.in

Reprint - 1990
Reprint - 2020

Price ₹ 1980-00 (Per Set)

Printed by :
**D.V. Printers**
97-U.B., Jawahar Nagar, Delhi-110007

# आमुखम्

लोककल्याणाय परमकारुणिका: ऋषय: आचार्या: च वेदान् पुराणानि शास्त्राणि च महता परिश्रमेण प्रणिनिन्यु:। तेषाम् उपबृह्मणरूपा: नैके ग्रन्था: विद्वद्भि: विरचिता: विरच्यमाना: सन्ति। अधीति:, बोध:, आचरणम्, प्रचारणम् इति विद्याया: चतुर्षु प्रकारेषु प्रचारणमपि अन्यतमम्। पूर्वसूरिभि: महता प्रयासेन लिखितानां ग्रन्थानां प्रकाशनेन ग्रन्थसुमनगतगहनविचारसुगन्धोऽपि सर्वत्र प्रसरेत्। तेन विद्याया: प्रचारोऽपि सिध्यति। यद्यपि केचन ग्रन्था: महता प्रयासेन द्रविणव्ययेन च प्रकाशमानीता: किन्तु ते ग्रन्था: कालान्तरे दुर्लभतां गता:। तेन संस्कृतग्रन्थानाम् अधिजिगीषूणाम् अनुसन्धित्सूनां च काठिन्यं समजनि। भारतशासनान्तर्गतमानव-संसाधनविकासमन्त्रालयस्य पूर्वप्रकाशितानां दुर्लभानां च ग्रन्थानां पुनर्मुद्रणात्मक-परियोजनायां पुनर्मुद्रिता: अपीमे ग्रन्था: कालक्रमेण भूयोपि दुर्लभतां जग्मु:। अत: पुनर्मुद्रणं कारयित्वा ग्रन्थानां सुलभता संपादनीया इति मन्त्रालयस्य सङ्कल्पमनु ग्रन्थरत्नानां पुनर्मुद्रणं प्रकाशनं च विधास्यते।

सन्दर्भेऽस्मिन् अपेक्षितं मार्गदर्शनं प्रदाय केन्द्रीयसंस्कृतविश्वविद्यालयं समेधितवद्भ्य: मानवसंसाधनविकासमन्त्रिवर्येभ्य: **डॉ. रमेश पोखरियाल निशंक** महाभागेभ्य: आधमर्ण्यं बिभर्मि। प्राशासनिकसहाय्यं विधाय कार्यसाफल्याय सहकृतवते मानवसंसाधनविकासमन्त्रालयस्य भाषाविभागस्य संयुक्तसचिवाय **श्री संजय कुमार सिन्हा** महाभागाय तद्विभागीयाधिकारिभ्य: कार्तज्ञ्यं संदिशामि।

संकल्पस्यास्य साकारतासंपादने प्रयासं कृतवन्तं विश्वविद्यालयस्य शोध-प्रकाशनविभागस्य उपनिदेशकं डा. मधुकेश्वर भट्टं तद्विविभागीयान् च साधुवादै: संभाजयामि। योग्ये काले सुन्दरं पुनर्मुद्रणं विधायोपकृतवते डी.वी. प्रिन्टर्स मुद्रणालयस्य अधिकारिणे साधुवादान् व्याहरामि। आशासे भूय: कृतानेन मुद्रणप्रयत्नेन विद्वांस:, छात्रा:, संस्कृतानुरागिण:, लाभान्विता: भूयासु: इति।

भवतां विधेय:
**परमेश्वरनारायणशास्त्री**
कुलपति:
केन्द्रीयसंस्कृतविश्वविद्यालय:

# अनुक्रमणिका।

दुःखपङ्कनिमग्नानां जीवानां षोड़शपदार्थ-तत्त्वज्ञानद्वारा दुःखात्यन्त-विमुक्तये परमकारुणिको महर्षिर्गोतमः षोड़शपदार्थनिरूपणात्मकं तर्क-शास्त्रं प्रणिनाय। स च महर्षिः प्रत्यक्षानुमानोपमान-शब्दात्मकप्रमाणचतुष्टयप्रामाण्यवादी, तन्मतमवलम्ब्य श्रीमद्गङ्गेशोपाध्यायः तत्त्वचिन्तामणि-नामकग्रन्थेन तादृशप्रमाणचतुष्टयस्य प्रामाण्यं सप्रपञ्चं सोपपत्तिकञ्च व्यवस्थापितवान्। स च तार्किकविदग्धाग्रणीर्मिथिलाजनपदमलङ्कार कस्मिन् समये कतममन्वयं मण्डयामास तद्विशेषेण नावधार्यते, किन्तु षड्-दर्शनटीकाकृद्वाचस्पतिमिश्रात् तस्याप्राचीनतैव निर्णेतुं शक्यते, यतस्तेन स्वग्रन्थे "प्रत्यक्षपरिकलितमप्यर्थमनुमानेन बुभुत्सन्ते तर्करसिकाः न हि करिणि दृष्टे चीत्कारेण तमनुमिमते अनुमातारः" इति वाचस्पतिवचनयो-रविरोध इति वदता तस्मात् स्वस्याप्राचीनता सूचिता। स एव नव्यन्यायस्य प्रथमप्रणेता, तस्यैव पाण्डित्यबलेन न्यायदर्शनं सर्वत्र समादरमाससाद। तद्ग्रन्थस्य चिन्तामणिसंज्ञकत्वेन महामहोपाध्याय-श्रीजयदेवमिश्रविर-चिततद्ग्रन्थव्याख्याया आलोकनामकत्वं, महामहोपाध्याय-श्रीरुचिदत्त-विरचिततद्ग्रन्थव्याख्यायाः प्रकाशनामकत्वं, तार्किकाग्रगण्यमहामहो-पाध्याय-श्रीरघुनाथशिरोमणिविरचिततद्ग्रन्थव्याख्याया दीधितिनामकत्वञ्च युक्तमेव। तादृशव्याख्यात्रयस्य उत्कर्षवत्त्वेऽपि अतिसंक्षिप्तत्वात् महामहो-पाध्याय-श्रीमथुरानाथ-तर्कवागीशेन रहस्यनामकातिविशदव्याख्यया तद्-ग्रन्थतात्पर्यमुपवर्णितं। अस्मिन् तत्त्वचिन्तामणिनामकग्रन्थे चत्वारः परि-च्छेदाः सन्ति, प्रथमः प्रत्यक्षपरिच्छेदः, द्वितीयः अनुमानपरिच्छेदः, तृतीय-उपमानपरिच्छेदः, चतुर्थः शब्दपरिच्छेदः, प्रथमपरिच्छेदे प्रत्यक्षप्रमितेः लक्षणं कारणं प्रामाण्यञ्च विशेषेणोपवर्णितं, द्वितीयपरिच्छेदे अनुमितेर्लक्षणं कारणं प्रामाण्यञ्च विशेषेणोपवर्णितं, ईश्वरानुमानप्रणाली विशेषेणोपवर्णिता

**णीया रजतत्ववति तदनुभवः तदभाववति तदनुभवो वेत्यादिना[१]। नन्व नुभवत्वस्य प्रमाप्रमासाधारण्येन**

---

इत्यादि ज्ञाने च[२] यदि केवलसमवायादिः सम्बन्धः तदा वृत्ते तदुभयोर्न भ्रमः किन्तु मूलादेर्वृत्तवृत्तिकपिसंयोग-तदभावाद्याधारतावच्छेदकत्वावगाहित्वांश एव भ्रमः। यदि च मूलावच्छिन्नत्वविशिष्टसमवायादिसम्बन्धस्तदा वृत्ते कपिसंयोगादेरपि भ्रम एव तादृशविशिष्टसम्बन्धावच्छिन्नकपिसंयोगाद्यभावस्य निरवच्छिन्नाधिकरणत्वस्यैव वृत्ते सत्त्वात्। एतेन पाकरक्तघटे इदानीमयं श्यामरूपवानित्यादि ज्ञानमपि व्याख्यातं। न च निरवच्छिन्नाधिकरणत्वस्य भ्रमलक्षणनिवेशे अन्योन्याभावस्य व्याप्यवृत्तित्वनियमवादिनये वृक्षः कपिसंयोगिभिन्न इति ज्ञानस्य भ्रमतया तत्राव्याप्तिः कपिसंयोगिभेदाभावस्य कपिसंयोगस्य[३] निरवच्छिन्नाधिकरणाप्रसिद्धेरिति वाच्यं। तन्नये[४] कपिसंयोगिभेदाभावो न कपिसंयोगस्वरूपः, किन्तु व्याप्यवृत्तिरतिरिक्त एवाभाव इत्यभ्युपगमात्[५]

---

(१) तज्ज्ञानं वेत्यादिनेति क०।

(२) मूले वृक्षः संयोगवान् अग्रे वृक्षः संयोगाभाववान् इत्यादिज्ञाने चेति क०।

(३) अत्यन्ताभावाभावस्य प्रतियोगिरूपत्वमिव अन्योन्याभावाभावस्य प्रतियोगितावच्छेदकरूपत्वमिति नियमात् इति भावः।

(४) अन्योन्याभावस्य व्याप्यवृत्तितानियमवादिनये इत्यर्थः।

(५) तथा च व्याप्यवृत्तिमद्भेदाभावस्यैव प्रतियोगितावच्छेदकरूपत्वं न त्वव्याप्यवृत्तिमद्भेदाभावस्य इति नियम इति भावः।



**तज्ज्ञानस्य न निष्कम्पप्रवृत्त्यङ्गत्वमिति चेत्। सत्यं। विशेषविषयप्रमाया एव प्रवर्त्तकत्वात्। अतिरिक्तविष-**

---

इत्येव तत्त्वमिति समासः। 'सर्व्वत्र प्रमेति सर्व्वत्र सर्व्वस्य प्रमेत्यर्थः, 'किन्तु क्वचित्' किन्तु क्वचित् कस्यचित्, 'कुत्र प्रमेतीति कुत्र कस्य प्रमेत्यर्थः, जिज्ञासायामिति शेषः, 'लक्ष्यत्वेन' लक्षयितुमुचितत्वेन।

नन्वेवं भ्रमेऽतिव्याप्तिरित्यतो लक्ष्यत्वेन परिहरति, 'भ्रमेऽपीति। 'विषयतेति विषयताश्रयावृत्त्यप्रकारकविषयताप्रतियोग्यनुभव इत्यर्थः, विषयताश्रयावृत्त्यप्रकारकस्यानुभव इति प्रतियोगित्वार्थकषष्ठ्या समासात्, विषयताश्रयावृत्त्यप्रकारकोऽनुभवः प्रमेत्यसमस्तपाठश्च प्रामादिकः। यद्यपि 'विषयताश्रयावृत्तीत्यत्र विषयतापदं न विषयतासामान्यपरं रजतत्वादिभ्रमातिव्याप्तेः, समवायादिसम्बन्धेनावृत्तेरेव समवायादिसम्बन्धेन विषयताश्रयावृत्तित्वात् तस्य धर्म्मितावच्छेदकांशे प्रमात्वेन लक्ष्यत्वाभ्युपगमे अनुभवत्वमात्रस्यैव सम्यक्त्वेन प्रतियोग्यन्तविशेषणवैयर्थ्यात्। नापि स्वविषयतापरं, स्वमनुभवः, रजत-रङ्गयोरिमे रङ्ग-रजते इति विपरीतभ्रमेऽतिव्याप्तेः तद्विषयतायाः तदीयविषयताश्रयावृत्त्यप्रकारकत्वात्। तथापि स्वाश्रयावृत्तिप्रकारकान्यविषयताप्रतियोग्यनुभवत्वं विवक्षितं, स्वं विषयता, धर्म्मितावच्छेदकमात्रांशे प्रमारूपोभ्रमस्तु न लक्ष्यः तेन शुक्ताविदं रजतमित्यादिभ्रमे नाव्याप्तिः, धर्म्मितावच्छेदकातिरिक्तांशे प्रमारूपो भ्रमस्तु लक्ष्य एव तेन रङ्ग-रजतयोरिदमिदञ्च रजतमित्यादिसमूहालम्बने विशेष्यतावच्छेदकभेदेन विषयताभेदेऽपि

स्वर्णजयन्तीवर्षम् 2019-20

॥ श्रीः ॥

श्रीमद्गङ्गेशोपाध्यायविरचिते

# तत्त्वचिन्तामणौ

अनुमित्यादिबाधान्तम्

## अनुमानखण्डम्

( द्वितीयो भागः प्रथम परिच्छेदः )


कालिकातास्थ-संस्कृतमहाविद्यालयाध्यापक-

श्रीकामाख्यानाथतर्कवागीशेन

परिशोधितम्



केन्द्रीयसंस्कृतविश्वविद्यालयः

संसदः अधिनियमेन स्थापितः

(प्राक्तनं राष्ट्रियसंस्कृतसंस्थानम्, मानितविश्वविद्यालयः)

भारतसर्वकारस्य मानवसंसाधनविकासमन्त्रालयाधीनः

स्वर्णजयन्तीवर्षम् 2019-20

॥ श्रीः ॥

श्रीमद्गङ्गेशोपाध्यायविरचितं

# तत्त्वचिन्तामणौ

अनुमित्यादिबाधान्तम्

## अनुमानखण्डम्

श्रीमथुरानाथतर्कवागीशकृत-'रहस्य'नामकटीकासहितम्

( द्वितीयो भागः प्रथम परिच्छेदः )

कालिकातास्थ-संस्कृतमहाविद्यालयाध्यापक-

**श्रीकामाख्यानाथतर्कवागीशेन**

परिशोधितम्

**केन्द्रीयसंस्कृतविश्वविद्यालयः**

**संसदः अधिनियमेन स्थापितः**

(प्राक्तनं राष्ट्रियसंस्कृतसंस्थानम्, मानितविश्वविद्यालयः)

**भारतसर्वकारस्य मानवसंसाधनविकासमन्त्रालयाधीनः**

Published with the Financial Assistance from Central Sanskrit University, Ministry of Human Resource Development, Govt. of India

Publisher :
**Registrar**
**Central Sanskrit University**
(Formerly Rashtriya Sanskrit Sansthan, Deemed to be University)
56-57, Institutional Area, Janakpuri, New Delhi-110058
EPABX : 28524993, 28521994, 28524995
website : www.sanskrit.nic.in

Reprint - 1990
Reprint - 2020

Price ₹ 1980-00 (Per Set)

Printed by :
**D.V. Printers**
97-U.B., Jawahar Nagar, Delhi-110007

# शुद्धिपत्रं ।

| अशुद्धं । | शुद्धं । | पृष्ठं । | पङ्क्तिः । |
|---|---|---|---|
| परामर्शौ | परामर्शो | २ | २ |
| निश्चयो | निश्चये | २१ | २ |
| साध्यभाव | साध्याभाव | ३१ | २ |
| साध्यासामान्यीय | साध्यसामान्यीय | ३१ | ८ |
| तदवृत्तित्व | तद्वदवृत्तित्व | ४० | २ |
| भदेना | भेदेना | ४८ | १० |
| घटाद्यभावत्वेव | घटाद्यभावस्यैव | ५६ | २ |
| करणेत्यन्ता | करणेत्यत्यन्ता | १०५ | १ |
| रहस्य | रहस्ये | १२३ | ३ |
| योजाभावे | योजनाभावे | १६२ | २० |
| सान | साधन | १६२ | २० |
| च | च- | १६७ | १ |
| च कास्तीति | चकास्तीति | १७० | १४ |
| तदा | तद्या | १७३ | ७ |
| माभूत् | मा भूत् | १८८ | ८ |
| उपधी | उपाधी | १९६ | ६ |
| विद्यमान | विद्यमानः | १९९ | ६ |
| संसर्गायहो | संसर्गाग्रहो | २०० | १२ |
| पाकप्राकजत्व | प्राकपाकजत्व | २०४ | ११ |
| [illegible] | द्याशङ्कते | २३१ | १ |

त्वादिति वाच्यं। प्रत्यक्षं हि तदन्यान्यत्वविशेषदर्शनाद्व्याप्यत्वज्ञानं जनयति विशेषणज्ञान-विशेषणविशेष्यसम्बन्ध-विशेषणविशेष्येन्द्रियसन्निकर्ष-तदसंसर्गाग्रहविशेषदर्शनानां सत्त्वेन वह्निव्याप्यत्वप्रत्यक्षसत्त्वात्। न चैवं न प्रत्यक्षेऽपि तदन्यान्यत्वज्ञानं सहकारीति वाच्यम्।

---

घटकधर्म्मद्वयस्यैवावच्छेदकत्वौचित्यात् लाघवद्वयसत्त्वेनैकत्वरूपलाघवस्याकिञ्चित्करत्वादिति भावः, 'व्यभिचारेति अन्यान्यत्वलक्षणव्यभिचारावारकधर्म्मघटितत्वाच्चेत्यर्थः, 'सन्दिग्धमेव' सन्देहकोटितावच्छेदकमेव, तदन्यान्यत्वस्य व्यभिचारावारकधर्मघटिततया तदन्यान्यद्वह्निव्याप्यमेव नेत्युक्तमिति भ्रमेणाशङ्कते, 'नन्विति।

केचित्तु वस्तुगत्या व्याप्यस्य पक्षधर्मताज्ञानं कारणमित्याशयेनाशङ्कते, 'नन्वितीत्याहुः।

'तदन्यान्यदिति पाठः, 'तदन्यान्यत्वमिति पाठे तदन्यस्यान्यत्वं यत्र इति बहुव्रीहिः(१) एवमुत्तरत्र, 'वह्निव्याप्यमेव, धूमालोकत्वरूपेण वह्निव्याप्यमेव। नन्वेवं धूमालोकान्यतरस्मादिति प्रयोगे कथं निग्रह इत्यत आह, 'पुरुषेति, 'नीलधूमवत्त्वादित्यत्रैवेति, नीलधूमत्वस्य व्यर्थविशेषणघटिततया तेन रूपेण व्याप्तिविरहेऽपि धूमत्वरूपेण व्याप्तिसत्त्वादिति भावः। भ्रमं निराकृत्य समाधत्ते, 'तदन्यान्यदिति,

---

(१) तदन्यान्यत्वं यत्रेति बहुव्रीहिरिति ग०। तदन्यत् अन्यत् यत्र इति बहुव्रीहिरिति घ०।



अन्वय-व्यतिरेकाभ्यां गुरोरपि तस्य विशेषदर्शनत्वेन प्रत्यक्षसहकारित्वात् तस्मात्तदन्यान्यत्वज्ञानं तत्र व्याप्यताज्ञानेनोपक्षीणं न तु साक्षादनुमितिहेतुरिति, किञ्च वह्निव्याप्यवानयमिति शाब्दज्ञाने व्याप्यत्वज्ञानं कार-

---

'व्याप्यज्ञानात्' व्याप्यस्य पक्षधर्मताज्ञानात्, 'अतिप्रसङ्गादिति वह्निव्याप्यो धूमः द्रव्यवान् पर्व्वत इत्यादिज्ञानादपि भवन्मतेऽनुमितिप्रसङ्गादित्यर्थः, 'व्याप्यतावच्छेदकप्रकारकज्ञानादिति व्याप्तिग्रहविशेष्यतावच्छेदकीभूतो यो व्याप्यतावच्छेदकधर्मस्तत्प्रकारकपक्षधर्मताज्ञानादित्यर्थः। 'न चैवमिति, 'एवं' धूमालोकान्यान्यत्वस्य व्याप्यतावच्छेदकत्वाभावे, धूमत्वालोकत्वादिरूपेण व्याप्तिज्ञानविरहदशायामिति शेषः, 'तदन्यान्यत्वादिति धर्मिपरो निर्देशः तादात्म्यसम्बन्धेन धूमालोकान्यतरेण हेतुनेत्यर्थः, 'नानुमेयं' नानुमातुं शक्यं, 'व्यर्थविशेषणत्वादिति व्यर्थविशेषणतया तस्य व्याप्यतावच्छेदकत्वाभावेन तद्धर्म्मावच्छिन्नस्य व्याप्यघटकत्वादित्यर्थः, तद्धर्म्मावच्छिन्नस्य व्याप्तिघटकत्वे तद्धर्मस्य व्याप्यतावच्छेदकत्वस्यावश्यकत्वात् यद्धर्म्मावच्छिन्नसमानाधिकरणाभावप्रतियोगितानवच्छेदकं साध्यतावच्छेदकं तस्यैव व्याप्यतावच्छेदकत्वात् इति भावः।

केचित्तु 'न चैवमिति, 'एवं' व्यर्थविशेषणत्वस्य व्याप्यतावच्छेदकताविघटकत्वे, धूमत्वादिना व्याप्तिज्ञानविरहदशायामिति शेषः, 'तदन्यान्यत्वादिति विशेषणताविशेषसम्बन्धेन धूमालोकान्यान्यत्वेन

स्वर्णजयन्तीवर्षम् 2019-20

॥ श्रीः ॥

श्रीमद्गङ्गेशोपाध्यायविरचितं

# तत्त्वचिन्तामणौ

ईश्वरानुमानपरम्

## अनुमानखण्डम्

( द्वितीयो भागः द्वितीयः परिच्छेदः )

कालिकातास्थ-संस्कृतमहाविद्यालयाध्यापक-
श्रीकामाख्यानाथतर्कवागीशेन
परिशोधितम्

केन्द्रीयसंस्कृतविश्वविद्यालयः
संसदः अधिनियमेन स्थापितः
(प्राक्तनं राष्ट्रियसंस्कृतसंस्थानम्, मानितविश्वविद्यालयः)
भारतसर्वकारस्य मानवसंसाधनविकासमन्त्रालयाधीनः

स्वर्णजयन्तीवर्षम् 2019-20

॥ श्रीः ॥

श्रीमद्गङ्गेशोपाध्यायविरचितं

# तत्त्वचिन्तामणौ

## ईश्वरानुमानपरम्

## अनुमानखण्डम्

श्रीजयदेवमिश्रविरचिताऽऽलोक-नामकटीकासहितम्

( द्वितीयो भागः द्वितीयः परिच्छेदः )


कालिकातास्थ-संस्कृतमहाविद्यालयाध्यापक-

**श्रीकामाख्यानाथतर्कवागीशेन**

परिशोधितम्



**केन्द्रीयसंस्कृतविश्वविद्यालयः**

**संसदः अधिनियमेन स्थापितः**

(प्राक्तनं राष्ट्रियसंस्कृतसंस्थानम्, मानितविश्वविद्यालयः)

भारतसर्वकारस्य मानवसंसाधनविकासमन्त्रालयाधीनः

Published with the Financial Assistance from Central Sanskrit University,
Ministry of Human Resource Development, Govt. of India

Publisher :
**Registrar**
**Central Sanskrit University**
(Formerly Rashtriya Sanskrit Sansthan, Deemed to be University)
56-57, Institutional Area, Janakpuri, New Delhi-110058
EPABX : 28524993, 28521994, 28524995
website : www.sanskrit.nic.in

Reprint - 1990
Reprint - 2020

Price ₹ 1980-00 (Per Set)

Printed by :
**D.V. Printers**
97-U.B., Jawahar Nagar, Delhi-110007

# अकारादिक्रमेण विषयसूची ।

## ईश्वरानुमानखण्डस्य ।

विषयः ।

ई ।

ईश्वरानुमानप्रणाली १ । १ ॥

क ।

कारणत्वलक्षणं १४८ । ७ ॥

त ।

त्रिदण्डिमते मुक्तिपदार्थः १८२ । ८ ॥

द ।

दाहाद्यनुकूलातिरिक्तशक्तिवादिमतं ११६ । ७ ॥

दाहाद्यनुकूलातिरिक्तशक्तिवादिमतखण्डनं १२२ । ४ ॥

दुःखाभावस्य पुरुषार्थत्वव्यवस्थापनं १७५ । १ ॥

प ।

प्राभाकरमते मुक्तिपदार्थः १७३ । ४ ॥

म ।

मुक्तिपदार्थविचारः १५६ । ७ ॥

मुक्तौ प्रमाणोपन्यासः १७७ । ४ ॥

व ।

विशिष्टाभावविचारः ९६ । २ ॥

स ।

संसर्गाभावान्योन्याभावयोर्भेदोपायव्यवस्थापनं १०७ । ८ ॥

कुलालवदिति सत्प्रतिपक्षः, अनित्यज्ञानानामाश्रयत्वस्योपाधित्वादित्याहुः। अत्राप्यप्रयोजकत्वे भेदाभेदयोर्गौरव-लाघवे एव शरणम्। तथापि कथं नित्यसर्वविषयज्ञानसिद्धिः। पक्षधर्म्मताबलादिति चेत्, व्यापकतयावगतस्य पक्षसम्बन्धमात्रं पक्षधर्म्माद्धेतोः सिध्यति तथाच पक्षे तदुपादानगोचरज्ञानमात्रं सिध्येन्न तु नित्यसर्वविषयज्ञानं तेन रूपेण व्यापकत्वाग्रहात्। न च येन विनानुपपत्तिः सोऽपि विषयः, व्यतिरेकिविलयापत्तेः।

तत्र प्राञ्चः यमर्थमनालम्बमानानुमितिः पक्षे साध्यसम्बन्धं न विषयीकरोति स पक्षधर्म्मताबलात्सिध्यतीत्यनुपपत्तिमूलकोऽन्वयी प्रतीतानुपपत्त्या च व्यतिरेकी तदिहानादिद्व्यणुकादिकार्यप्रवाहस्य पक्षत्वे तदुपादानस्यानादिज्ञानगोचरत्वं विना नोपादानगोचरज्ञानजन्यत्वमनादिकार्यप्रवाहस्यानुमितिरालम्बते, अनादितैव च नित्यता सर्वमुक्तावपि तत्सत्त्व-

तद्बीजन्तु लाघवानवतारे उक्तानुमानस्याप्रयोजकत्वमेव, तदवतारे किमनुमानान्तरेणेत्यादिकमाकर एव स्फुटमिति।

'तत्र प्राञ्च इति, अत्र सर्वेषु कल्पेषु वक्ष्यन्तरनिर्देशात् स्वानुमतिरुन्नीयते तद्बीजमपि अनित्यप्रत्येकविषयज्ञानपक्षे



मनादिभावत्वात् पक्ष-तदुपादानविषयतैव च सर्वविषयता लाघवात्तु तावद्विषयकमनाद्येकमेव ज्ञानं सिध्यति, न तु नित्यानित्यज्ञानानीति।

नव्यास्तु अनित्यज्ञानाजन्यत्वेन पक्षविशेषणात् ज्ञानं सिध्यन्नित्यमेव सिध्यति अनित्ये बाधादिति।

वाचस्पतिमिश्रास्तु लाघवादेकज्ञानसिद्धौ उत्पत्तिमतोऽनादिकार्यप्रवाहं प्रत्यजनकत्वात् परिशेषेण नित्यज्ञानादिसिद्धिः। नियतविषयता च ज्ञानस्य कारणाधीना, कारणञ्च नित्यज्ञानान्निवर्त्तमानं नियतविषयतामादाय निवर्त्तत इतिं सर्वविषयत्वसिद्धिरिति।

षट्पदार्थप्रतिपादकवेदकर्तृत्वेनेश्वरस्य षट्पदार्थगोचरसाक्षात्कारवत्त्वेन वा सार्वज्ञम्। घटाकाशसंयोगादिकं प्रति ईश्वरस्य कर्तृत्वात् घटादिगोचरमपि ज्ञानं सिद्धमिति केचित्।

ननु घटादीनां कथमीश्वरकर्तृकत्वं भवति। घट-

गौरवं नित्यसर्वविषयकज्ञानपक्षे गौरवं, नित्यसर्वविषयकज्ञानपक्षे लाघवमिति लाघवावतारे पूर्वोक्तन्यायेन नित्यसर्वविषयकज्ञानसिद्धावलमेभिरायासबहुलैः कल्पैरित्यादि स्फुटमेवेति न प्रदर्शितं विशिष्येति स्मर्तव्यं।

ननु घटोपादानगोचरत्वे भगवज्ज्ञानादीनां सिद्धेऽपि न तद्धेतुता।

जयन्तीवर्षम् 2019-20

॥ श्रीः ॥

श्रीमद्गङ्गेशोपाध्यायविरचितं

# तत्त्वचिन्तामणौ

## उपमानखण्डम्

( तृतीयो भागः )

कलिकाता-संस्कृतमहाविद्यालयाध्यापक-
श्रीकामाख्यानाथतर्कवागीशेन
परिशोधितम्


केन्द्रीयसंस्कृतविश्वविद्यालयः
संसदः अधिनियमेन स्थापितः
(प्राक्तन राष्ट्रियसंस्कृतसंस्थानम्, मानितविश्वविद्यालयः)
भारतसर्वकारस्य मानवसंसाधनविकासमन्त्रालयाधीनः

स्वर्णजयन्तीवर्षम् 2019-20

॥ श्रीः ॥

श्रीमद्गङ्गेशोपाध्यायविरचितं

# तत्त्वचिन्तामणौ

## उपमानखण्डम्

श्रीकृष्णकान्तविद्यावागीशकृत-'दीपन्या'ख्यटीकासहितम्

(तृतीयो भागः)

कालिकातास्थ-संस्कृतमहाविद्यालयाध्यापक-

**श्रीकामाख्यानाथतर्कवागीशेन**

परिशोधितम्

**केन्द्रीयसंस्कृतविश्वविद्यालयः**

**संसदः अधिनियमेन स्थापितः**

(प्राक्तनं राष्ट्रियसंस्कृतसंस्थानम्, मानितविश्वविद्यालयः)

**भारतसर्वकारस्य मानवसंसाधनविकासमन्त्रालयाधीनः**

**Published with the Financial Assistance from Central Sanskrit University, Ministry of Human Resource Development, Govt. of India**

Publisher :
**Registrar**
**Central Sanskrit University**
(Formerly Rashtriya Sanskrit Sansthan, Deemed to be University)
56-57, Institutional Area, Janakpuri, New Delhi-110058
EPABX : 28524993, 28521994, 28524995
website : www.sanskrit.nic.in

Reprint - 1990
Reprint - 2020

Price ₹ 1980-00 (Per Set)

Printed by :
**D.V. Printers**
97-U.B., Jawahar Nagar, Delhi-110007

# तत्त्वचिन्तामणि-तट्टीकाकारधृतश्लोकानां प्रतीकस्य अकारादिक्रमेण सूची ।

## उपमानखण्डस्य ।


प्रतीकः ।

अ ।

अथ साम्नफले ३ । १३ ॥

ए ।

एवं जाति-गुण-द्रव्य- १६ । ४ ॥

ग ।

गगनं गगनाकारं ४१ । ४ ॥

स ।

सामान्यान्येव भूयांसि १३ । २ ॥

# तत्त्वचिन्तामणिकार-तट्टीकाकारोल्लिखितग्रन्थकार-नाम्नां अकारादिक्रमेण सूची ।

## उपमानखण्डस्य ।

ग्रन्थकारनामानि ।


### ए ।

एकदेशी ४१ । १२ ॥

### ज ।

जयन्तभट्टः ६१ । ३ ॥

जरन्नैयायिकः २४ । १८ ॥

### न ।

नवीनमीमांसकाः ३५ । ५ ॥

नव्याः ५ । ४ ॥ २५ । १६ ॥

### म ।

मिश्राः ३ । ५ ॥

मीमांसकः ३ । २० ॥ १५ । १६ ॥ २४ । १८ ॥ ४४ । ७ ॥ ५५ । १६ ॥

### स ।

साम्प्रदायिकाः ५ । ३ ॥ १३ । १२ ॥


# अकारादिक्रमेण विषयसूची ।

## उपमानखण्डस्य ।

विषयः ।


### उ ।

उपमाननिरूपणप्रतिज्ञा १ । १ ॥

उपमानप्रामाण्यमनङ्गीकुर्व्वतां मतं ६५ । ३ ॥

उपमानप्रामाण्यमनङ्गीकुर्व्वतां मतखण्डनं ६६ । १ ॥

उपमितिस्वरूपनिरूपणे जयन्तभट्टप्रभृतिमतं ६१ । १ ॥

उपमितिस्वरूपनिरूपणे जयन्तभट्टप्रभृतिमतखण्डनं ६१ । ३ ॥

उपमितिस्वरूपनिरूपणे मीमांसकमतं ४५ । २ ॥

उपमितिस्वरूपनिरूपणे मीमांसकमतखण्डनं ४० । १ ॥

उपमितिस्वरूपनिरूपणे स्वमतव्यवस्थापनं ६२ । ६ ॥

### स ।

सादृश्यस्यातिरिक्तपदार्थतावादिन एकदेशिनोमतं ४१ । ३ ॥

सादृश्यस्यातिरिक्तपदार्थतावादिन एकदेशिनोमतखण्डनं ४२ । ३ ॥

सादृश्यस्यातिरिक्तपदार्थतावादिनव्यमीमांसकमतं ३५ । १ ॥

सादृश्यस्यातिरिक्तपदार्थतावादिनव्यमीमांसकमतखण्डनं ३६ । ४ ॥

सादृश्यस्यातिरिक्तपदार्थतावादिमीमांसकमतं १ । १ ॥

सादृश्यस्यातिरिक्तपदार्थतावादिमीमांसकमतखण्डनं २४ । ४ ॥

**गोसादृश्यं गोगतगवयसादृश्यं विनानुपपद्यमानं तत्कल्पयति, न हि गोसदृशो गवय एतद्विसदृशो गौरिति वाच्यमिति निरस्तम् । गवयनिरूपितगोसादृश्याप्रसिद्धौ तेन विनानुपपत्तिज्ञानाभावात् । किञ्च तवार्थापत्तिर्व्यतिरेक्यनुमानं । न च गवयगतसादृश्यप्रतियो-**

---

दानमसङ्गतं, तथापि गवि सन्निकर्षदशायामपि तादृशज्ञानस्य नानुमितित्वसम्भव इत्यावेदनायैव तथोक्तिरिति । अयमर्थापत्तेः प्रमाणान्तरत्वस्वीकारात् । तच्च तन्नास्तीत्याह, 'अतएवेति वक्ष्यमाणदोषादेवेत्यर्थः, अस्य निरस्तमिति परेणान्वयः, 'गवीति, 'तत्कल्पयतीति परेणान्वयः । गवयगतगोसादृश्यं तत्कल्पनकर्त्तृ तच्च विशेषणं अनुपपद्यमानान्तं, 'तत्' गवयसादृश्यं । न चापाद्यापादकयोः वैयधिकरण्यं, गवयगतगोसादृश्यपदेन गोनिष्ठस्य गवयनिष्ठसादृश्यप्रतियोगित्वस्य उक्तत्वात् । आपाद्यापादकयोर्व्यभिचाराभावं ग्राहयति, 'न हीति, 'एतद्विसदृशः' एतत्सादृश्याभाववान् इत्यर्थः । गोरसन्निकृष्टत्वेनापाद्यज्ञानासम्भवेन तदनुपपत्तिज्ञानमसम्भवीति दूषयति, 'गवयनिरूपितेति, 'गोसादृश्याप्रसिद्धाविति, गोरसन्निकृष्टत्वेनेत्यादिः, 'अप्रसिद्धौ' अनिश्चये, 'तेन विना' तादृशसादृश्येन विना, 'अनुपपत्तिज्ञानाभावादिति अनुपपत्तिज्ञानासम्भवादित्यर्थः । अर्थापत्तेः प्रमाणान्तरत्वं नैयायिकैरनङ्गीकारात् किं दूषणान्तरदाने प्रयास इत्यभिप्रायेणाह, 'किञ्चेति, 'तव' नैयायिकस्य, 'व्यतिरेक्यनुमानं' तत्स्वरूपेत्यर्थः । तस्यास्तथात्वे का क्षतिरित्यत आह, 'न चेति,



**गित्वं गवि प्रत्यक्षादिना ज्ञातुं शक्यमित्युक्तम् । नन्वेवं करभे गोवैधर्म्यज्ञानात् गवि करभवैधर्म्यज्ञानमपि मानान्तरात् स्यादिति चेत्, न, गवि करभवैधर्म्यं यदि करभवृत्तिधर्म्माभाववत्त्वं तदा स्मृते गवि प्रागस्तितावदनुपलब्धेः गम्यमेव(१) । अथ करभावृत्तिधर्मवत्त्वं तदा**

---

ज्ञातुं शक्यमिति परेणान्वयः । 'उक्तमिति गवयगतसादृश्यप्रतियोगित्वञ्च गवि न प्रत्यक्षमिति ग्रन्थे इत्यादिः । शङ्कते, 'नन्वेवमिति, 'एवं' गवये गोसादृश्यज्ञानानन्तरं गवि गवयसादृश्यज्ञानस्य मानान्तरादुत्पन्नत्वे, 'मानान्तरात्' प्रत्यक्षानुमान-शब्दातिरिक्तप्रमाणात् उपमानादिति यावत्, तथाच भवदुक्तलक्षणस्य तत्रागमनादव्याप्तिरिति भावः । अपरे तु 'मानान्तरात्' क्लृप्तप्रमाणातिरिक्तप्रमाणादित्यर्थः, उपमानलक्षणस्य तत्रागमनेन तस्य तदन्तर्गतत्वासम्भवादिति भावः । तथाच भवन्मते प्रमाणान्तरस्वीकारप्रसङ्ग इत्यभिप्रायः । करभवैधर्म्यं वितर्क्य समाधत्ते, 'नेति, 'प्रागस्तितावत्' पूर्ववर्त्तीत्यर्थः, 'अनुपलब्धेः' करभनिष्ठाभावप्रतियोगिधर्मवत्त्वं विना गवि करभवृत्तिधर्माभाववत्त्वमनुपपन्नमिति ज्ञानात्, जन्यत्वं पञ्चम्यर्थः, स च ज्ञानविषयार्थकगम्यपदार्थैकदेशे ज्ञानेऽन्वेति, तथाच तादृशानुपपत्तिज्ञानजन्यज्ञानविषय एवेत्यर्थः । एवञ्च तस्योपमानलक्षणालक्ष्यत्वेन कुतोऽव्याप्ति-

---

(१) अनुपलब्धिगम्यमेवेति ख० ।

स्वर्णजयन्तीवर्षम् 2019-20

॥ श्रीः ॥

श्रीमद्गङ्गेशोपाध्यायविरचित

# तत्त्वचिन्तामणौ

शब्दाप्रामाण्यवादादि उच्छन्न-प्रच्छन्नवादान्तं

## शब्दखण्डम्

( चतुर्थो भागः प्रथमः परिच्छेदः )


कलिकातास्थ-संस्कृतमहाविद्यालयाध्यापक-

श्रीकामाख्यानाथतर्कवागीशेन

परिशोधितम्



केन्द्रीयसंस्कृतविश्वविद्यालयः

संसदः अधिनियमेन स्थापितः

(प्राक्तनं राष्ट्रियसंस्कृतसंस्थानम्, मानितविश्वविद्यालयः)

भारतसर्वकारस्य मानवसंसाधनविकासमन्त्रालयाधीनः

स्वर्णजयन्तीवर्षम् 2019-20

॥ श्रीः ॥

श्रीमद्गङ्गेशोपाध्यायविरचितं

# तत्त्वचिन्तामणौ

शब्दाप्रामाण्यवादादि उच्छन्न-प्रच्छन्नवादान्तं

## शब्दखण्डम्

श्रीमथुरानाथतर्कवागीशकृत-'रहस्य'नामकटीकासहितम्

(चतुर्थो भागः प्रथम परिच्छेदः)

कालिकातास्थ-संस्कृतमहाविद्यालयाध्यापक-

**श्रीकामाख्यानाथतर्कवागीशेन**

परिशोधितम्

**केन्द्रीयसंस्कृतविश्वविद्यालयः**

संसदः अधिनियमेन स्थापितः

(प्राक्तनं राष्ट्रियसंस्कृतसंस्थानम्, मानितविश्वविद्यालयः)

भारतसर्वकारस्य मानवसंसाधनविकासमन्त्रालयाधीनः

**Published with the Financial Assistance from Central Sanskrit University, Ministry of Human Resource Development, Govt. of India**

Publisher :
**Registrar**
**Central Sanskrit University**
(Formerly Rashtriya Sanskrit Sansthan, Deemed to be University)
56-57, Institutional Area, Janakpuri, New Delhi-110058
EPABX : 28524993, 28521994, 28524995
website : www.sanskrit.nic.in

Reprint - 1990
Reprint - 2020

Price ₹ 1980-00 (Per Set)

Printed by :
**D.V. Printers**
97-U.B., Jawahar Nagar, Delhi-110007

# तत्त्वचिन्तामणौ शब्दखण्डे शब्दाप्रामाण्यवादादि-उच्छन्न-प्रच्छन्नवादान्तभागस्य सूचीपत्रं ।


| विषयः । | पृष्ठं । |
|---|---|
| शब्दप्रमाणलक्षणं | १० |
| शब्दाप्रामाण्यवादिबौद्धमतं | १४ |
| तत्खण्डनं | १७ |
| शब्दाप्रामाण्यवादिजरन्मीमांसकमतं | ८३ |
| तत्खण्डनं | ८५ |
| शब्दाप्रामाण्यवादिप्रभाकरादिमतं | ९२ |
| तत्खण्डनं | १०२ |
| स्वमते शब्दस्य प्रमाणान्तरत्वव्यवस्थापनं | १८२ |
| आकाङ्क्षावादपूर्व्वपक्षः | १८५ |
| आकाङ्क्षावादसिद्धान्तः | २०८ |
| योग्यतावादपूर्व्वपक्षः | २४५ |
| योग्यतावादसिद्धान्तः | २६२ |
| आसत्तिवादः | २८६ |
| तात्पर्य्यवादे परमतखण्डनं | ३१९ |
| तात्पर्य्यवादे स्वमतव्यवस्थापनं | ३२३ |
| तात्पर्य्यवादे मीमांसकमतं | ३४० |
| तत्खण्डनं | ३४९ |
| शब्दानित्यतावादपूर्व्वपक्षः | ३७५ |
| शब्दानित्यतावादसिद्धान्तः | ४३४ |
| उच्छन्न-प्रच्छन्नवादः | ४६५ |

**हेतुत्वात् । शब्दे नासाधारण्यं उत्थितोत्थाप्याकाङ्क्षयो-**

परामर्शतृतीयक्षणे[१] अनुमित्युत्पत्तेस्तत्परामर्शजन्यानुमितिप्रागभावसत्त्वादित्यरुचेराह, 'प्रागभावस्येति, तदुच्चारणजन्यशाब्दधीप्रागभावस्येत्यर्थः, प्रागभावत्वेनेति शेषः । यत्र तादात्म्यसम्बन्धेन कार्य्यं तत्र प्रतियोगितासम्बन्धेन प्रागभाव इति तादात्म्य-प्रतियोगित्वघटितसामानाधिकरण्यप्रत्यासत्त्या प्रागभावत्वेन कार्य्यत्वेन कार्य्य-कारणभावादिति भावः । 'शब्दे नासाधारण्यमिति आकाङ्क्षाया न शब्दजन्यज्ञाननिरूपितकारणतामात्रवत्त्वमित्यर्थः, प्रागभावत्वरूपेणान्यत्रापि हेतुत्वादिति भावः । न चेष्टापत्तिः, आकाङ्क्षा शाब्दबुद्धावसाधारणकारणमिति सकलप्रामाणिकप्रवादविरोधापत्तेरिति हृदयं । ननु शाब्दबुद्धिनिरूपितकारणतामात्रवत्त्वं न प्रामाणिकप्रवादार्थः किन्तु शाब्दबुद्धिमात्रनिरूपितकारणतावत्त्वं तच्च प्रागभावत्वेनान्यत्र हेतुत्वेऽपि निरुक्तप्रागभावत्वेन कारणतामादाय सम्भवतीत्यत आह, 'उत्थितेति ससम्बन्धिकपदनिरूपिताकाङ्क्षा उत्थिताकाङ्क्षा, तादृशपदानिरूपिताकाङ्क्षा उत्थाप्याकाङ्क्षा, 'उत्कर्षेति उत्थितोत्थाप्यव्यवहारनियामकौ उत्कर्षापकर्षौ न स्यातामित्यर्थः, यथासङ्ख्येन बोध्यं, 'तदभावादिति उत्कर्षादेरसम्भवादित्यर्थः, उत्कर्षादेर्जातित्वादिति भावः। इदमप्ययुक्तं ससम्बन्धिकपदार्थतात्पर्य्यकपदज्ञानघटितत्वाघटितत्वाभ्यामेवोत्थितोत्थाप्यव्यवहारोपपत्तेरतिरिक्तोत्कर्षादिजातौ मानाभावादन्यथा सिद्धान्तलक्षणेऽप्यगतेः ।

(१) तत्परामर्शात् तृतीयक्षणे इति ग० ।



**उत्कर्षापकर्षौ न स्यातां प्रागभावे तदभावात् ।**

नव्यास्तु तदुच्चारणजन्यतादृशशाब्दधीप्रागभावस्याकाङ्क्षात्वे घटः कर्म्मत्वमित्यादौ घटवत्कर्म्मत्वमित्यादिभेदान्वयबोधापत्तिर्दुर्वारा तदुच्चारणजन्यतादृशशाब्दधीप्रागभावस्याप्रसिद्ध्या तदभावेन तत्र तादृशशाब्दबुद्ध्यभावस्य वक्तुमशक्यत्वात् घटमानयेत्याद्युच्चारणान्तरजन्यतादृशशाब्दधीप्रागभावस्य च तत्रापि सत्त्वात्[१] कार्य्याभावस्य कारणाभावाधीनत्वात् । अथ घटवत्कर्म्मत्वमित्यादिभेदान्वयबोधं प्रति घटमित्याद्यानुपूर्व्वीविशेषस्य हेतुत्वात् तदभावादेव तत्र तादृशशाब्दबोधाभावः । न चैवमानुपूर्व्वीविशेष एवाकाङ्क्षास्तु किं निरुक्तप्रागभावरूपाकाङ्क्षायास्तत्त्वेन हेतुतयेति वाच्यं । घटमानयेत्यादौ विनापि वक्तुः शाब्दबोधद्वयेच्छामेकेनैवोच्चारणेन धारावाहिकद्वित्रादिशाब्दबोधवारणाय तेन रूपेण हेतुत्वाभ्युपगमादिति चेत्, न, तद्वारणाय प्राथमिकशाब्दबोधव्यक्तिं प्रति तत्प्रागभावव्यक्तेस्तत्प्रागभावत्वेन हेतुत्वस्यैवोचितत्वात् तदुच्चारणजन्यशाब्दबुद्ध्यन्तरस्याप्रसिद्धतया प्राथमिकतद्व्यक्तिप्रागभावाभावेनैव द्वितीयादिक्षणे तदुच्चारणजन्यतादृशशाब्दबुद्ध्यापत्तिवारणसम्भवात् एकेनोच्चारणेन शाब्दबुद्धिद्वयाजननात् कार्य्य कारणभाववाहुल्यस्य तुल्यत्वात् कारणतावच्छेदक-कार्य्यतावच्छेदकयोर्गौरवस्य पुनस्तवाधिकत्वात् । तादृशशाब्दबुद्धिसामान्यापादनञ्च तवापि दुर्वारं तदुच्चारणान्तरजन्यता-

(१) तथाच तादृशशाब्दधीप्रागभावाभावोऽपि नात्र कार्य्याभावप्रयोजक इति भावः ।

स्वर्णजयन्तीवर्षम् 2019-20

॥ श्रीः ॥

श्रीमद्गङ्गेशोपाध्यायविरचितं

# तत्त्वचिन्तामणौ

विधिवादादिप्रमाणचतुष्टयप्रामाण्यवादान्तं

## शब्दखण्डम्

( चतुर्थो भागः द्वितीयः परिच्छेदः )

कलिकातास्थ-संस्कृतमहाविद्यालयाध्यापक-
श्रीकामाख्यानाथतर्कवागीशेन
परिशोधितम्

केन्द्रीयसंस्कृतविश्वविद्यालयः
संसदः अधिनियमेन स्थापितः
( प्राक्तनं राष्ट्रियसंस्कृतसंस्थानम्, मानितविश्वविद्यालयः )
भारतसर्वकारस्य मानवसंसाधनविकासमन्त्रालयाधीनः

स्वर्णजयन्तीवर्षम् 2019-20

॥ श्रीः ॥

श्रीमद्गङ्गेशोपाध्यायविरचितं

# तत्त्वचिन्तामणौ

विधिवादादिप्रमाणचतुष्टयप्रामाण्यवादान्तं

## शब्दखण्डम्

श्रीमथुरानाथतर्कवागीशकृत-'रहस्य'नामकटीकया, श्रीजयदेव-
मिश्रकृताऽऽलोकाख्यटीकया, श्रीरघुनाथशिरोमणिकृतेन
आख्यातवादेन नञ्वादेन च सहितम्

( चतुर्थो भागः द्वितीयः परिच्छेदः )

कालिकातास्थ-संस्कृतमहाविद्यालयाध्यापक-

**श्रीकामाख्यानाथतर्कवागीशेन**

परिशोधितम्

**केन्द्रीयसंस्कृतविश्वविद्यालयः**

**संसदः अधिनियमेन स्थापितः**

(प्राक्तनं राष्ट्रियसंस्कृतसंस्थानम्, मानितविश्वविद्यालयः)

**भारतसर्वकारस्य मानवसंसाधनविकासमन्त्रालयाधीनः**

**Published with the Financial Assistance from Central Sanskrit University.
Ministry of Human Resource Development, Govt. of India**

Publisher
**Registrar**
**Central Sanskrit University**
(Formerly Rashtriya Sanskrit Sansthan, Deemed to be University)
56-57, Institutional Area, Janakpuri, New Delhi-110058
EPABX : 28524993, 28521994, 28524995
website : www.sanskrit.nic.in

Reprint - 1990
Reprint - 2020

Price ₹ 1980-00 (Per Set)

Printed by :
**D.V. Printers**
97-U.B., Jawahar Nagar, Delhi-110007

# तत्त्वचिन्तामणिकार-तट्टीकाकारोल्लिखितग्रन्थनाम्नां अकारादिक्रमेण सूची ।

## शब्दपरिच्छेदीयद्वितीयभागस्य ।

ग्रन्थनामानि ।

### प ।

प्रत्यक्षप्रकाशः ९५ । १७ ॥

### व

वेदः १ । १ ॥ २ । २ ॥ ५२१ । २ ॥

### श्रु

श्रुतिः २२७ । ४ ॥ २२९ । १ ॥ ११९ । १८ ॥ ३२० । ९ ॥ ५१४ । ३ ॥

मुत्प्रेक्षयाः पृथक् प्रमाणत्वं, व्यभिचारिजातीयतया लिङ्गादाविव प्रमाकरणतावच्छेदकानतिप्रसक्तानुगतरूपाभावान्निर्व्यापारत्वाच्च, किन्तु प्रमाणसहकारिणी सा । अतएव मानसे लिङ्गपरामर्शे व्याप्तिस्मृत्यादि न पृथक् प्रमाणं । अथ पदमन्तरेणापि योग्यतादि-

संसर्गाग्रहपरिग्रहः । 'न चैवमिति, यदसाधारणं सहकार्य्यासाधेति न्यायादिति भावः । 'उत्प्रेक्षाया इति, इदमुपलक्षणं पदार्थोपस्थितेरपि बोध्यं । 'व्यभिचारिजातीयतयेति उत्प्रेक्षायाः क्वचिद्भ्रमं प्रत्यपि जनकतयेत्यर्थः, 'लिङ्गादाविवेति लिङ्गपरामर्शादाविवेत्यर्थः, तत्र सल्लिङ्गपरामर्शस्यैव शाब्दरूपत्वादिति भावः । 'करणता' कारणता, 'सेति, क्वचिदिति शेषः । अतिरिक्तनिर्व्वचनाय पुनः शङ्कते, 'अथेति, 'अन्वयबोधः' शाब्दानुभवः, 'पश्यतः श्वेतमा रूप-

त्वापत्तेः उक्तयुक्तेस्चेति भावः । 'व्यभिचारीति, ननु तत्तदुत्प्रेक्षातः कदाचित् प्रमोत्पत्तेः तत्तद्विशेषहेतुत्वमावश्यकमिति तथैव प्रमाणत्वमस्तु पदार्थज्ञानं वा तथाऽस्तु यथा च चक्षुरादौ व्यभिचारिव्यावृत्तं निर्द्दोषत्वादिकमवच्छेदकं तथा प्रकृतेऽप्यस्तु । यदि च निर्व्वारतया न तथात्वं तदा परार्थोपस्थापकचिन्तादेस्तथात्वमस्तु । न चाननुगमः, उपाधिविशेषस्य तथात्वापत्तेः । यदि च तस्य स्मरण एवोपक्षयः तदा पदेऽपि तुल्यं । किञ्चानुमितेः परामर्शव्यापारकमनःकरणकत्वपक्षे यथा परामर्शस्य प्रमाणान्तरत्वं तथा प्रकृतेऽप्यस्त्विति चेत्, नैवं, फलबलेन परामर्शस्य विजातीयप्रमाजनकत्वं प्रकृते च न तथेति प्रमित्यन्तरासाधारणकारणासहकृतमनोजन्यत्वेनास्य मानसत्वेन तत्करणस्यातथात्वात् अधिकमनुमानप्रकाशे विपञ्चितं । अन्वयविरोधिपदाजन्यपदार्थोपस्थितिर्हेतुरित्याशयेन शङ्कते, 'अथेति । 'आ रूप-



ज्ञानेऽन्वयबोधो भवत्यतः पदार्थस्मरण एव पदानामुपक्षयः । तदुक्तं "पश्यतः श्वेतमा रूपं ह्रेषाशब्दञ्च शृण्वतः । खुरविक्षेपशब्दञ्च श्वेतोऽश्वो धावतीति धीः" ॥ इति चेत्, सत्यं,[१] प्रयोजकवाक्योच्चारणानन्तरं प्रयोज्यव्यापारदर्शनात् अन्वितज्ञानोपपत्त्यर्थं पदस्यैव शक्तिः कल्प्यते प्रथमतस्तस्यैव कारणत्वावधारणात्

मिति श्वेतं रूपमा पश्यत इति योजना, आपदमीषदर्थकं, 'प्रयोजकेति प्रयोजकतत्तत्पदोच्चारणानन्तरमेवेत्यर्थः, 'प्रयोज्येति प्रयोज्येन स्वस्य तत्तत्पदार्थशाब्दबोधदर्शनादित्यर्थः, अन्वय-व्यतिरेकाभ्यमिति शेषः, 'अन्वितज्ञानेति तत्तत्पदार्थशाब्दात्मकोपस्थितावित्यर्थः, 'पदस्यैव' तत्तत्पदस्यैव, 'शक्तिः' ज्ञानविषयतया कारणतावच्छेदकता, 'प्रथमत इति आद्यव्युत्पत्तिसमय इत्यर्थः, 'तस्यैव' पदत्वावच्छिन्नस्यैव, 'कारणत्वावधारणादिति शाब्दबुद्धिसामान्यं प्रति

[१] इति चेत्, नेति क० ।

मिति, 'आ' ईषत्, श्वेतं रूपं पश्यत इत्यर्थः, इत्येके । 'आ पश्यत इति व्यवहितोपसर्ग इत्यन्ये । आरूपशब्दोऽस्पष्टार्थक इत्यप्याहुः । तथा हेतुत्वे गौरवमित्याशयेनाह, 'प्रयोजकेति, 'प्रथमत इति । ननूपायस्यान्वयादेः साधारणतया प्रयोजकत्वमात्रमवधारयति, न तु कारणत्वं गृहीतमपि कारणद्वयकल्पनागौरवादग्रे त्याज्यं कार्य्यान्वितशक्तिवत् । न चैवं पदे शक्तिरपि न स्यात् इति वाच्यं । प्रयोजकत्वगर्भाया एवेश्वरेच्छायाः शक्ति-